International Journal of Sanskrit Research 2022; 8(5): 79-81

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 79-81
© 2022 IJSR
www.anantaajournal.com
Received: 23-04-2022
Accepted: 27-06-2022

**दिननाथशर्मा**
सहायकप्राध्यापकः व्याकरणविभागः
सिक्किम-सरकारी-संस्कृत-महाविद्यालयः
साम्दोङ्गः, सिक्किम, भारत

**Corresponding Author:**
**दिननाथशर्मा**
सहायकप्राध्यापकः व्याकरणविभागः
सिक्किम-सरकारी-संस्कृत-महाविद्यालयः
साम्दोङ्गः, सिक्किम, भारत

# व्याकरणशास्त्रस्य प्रयोजनं तस्य व्यापकता च

**दिननाथशर्मा**

## प्रस्तावना

व्याकरणशास्त्रं न केवलं शब्दनिर्माणविषयः। अनेन वेदप्रभृतिभ्यः सामाजिकपर्यन्तं शिक्षाप्रदेति। लौकिकवैदिकयोर्मध्ये कश्च सम्बन्धेऽति विषयेऽपि प्रतिपादयति। वैदिककालेऽपि प्रातिशाख्यम् इति नामधेयेन ज्ञायते स्म। विना व्याकरणेन शब्दसाधुत्वं नैव लभ्यते। कथं शब्दाः प्रयोक्तव्याः, केन हेतुना प्रकृतिप्रत्यययोर्मध्ये सम्बन्धो दरीदृश्यते, व्याकरणशब्दस्य क आशयः, अनेन किं फलं प्रदेतीति विषयेषु वैभिन्नेनोपस्थाप्यते। शास्त्रमिदं न केवलं शब्दबोधनार्थमेव परन्तु सामाजिक-वैज्ञानिक-धार्मिक-व्यावहारिकादीनां विषयानामपि प्रवृत्तिर्ज्ञापयति। व्याकरणशास्त्रेषु पाणिनीयव्याकरणमुन्नतमिति प्रतिभाति। उक्तमपि-

> पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
> सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥

अत एवैतेषु विषयेषूपलभ्यमानाः विषयाः अत्र प्रस्तूयन्ते।

## विषयविस्तार

आदिमकालादेवाद्यतनसमयं यावत् देशेऽस्मिन् ये केऽपि विद्वांसः सञ्जाताः सन्ति, तेषां सर्वेषामपि मतमिदं यत् संसारे यावदपि ज्ञानं प्रावर्त तावत् सर्वस्यापि आदिस्रोतोऽस्ति वेदः। अत एव स्वयम्भुवमनुरपि सर्वज्ञानमयो हि सः इत्यकथयत्। एतेन व्याकरणशास्त्रस्यादिमूलो वेद इति निष्पन्नः। तस्यैव वेदस्य प्रधानाङ्गतया सम्प्रभूतं वर्ततेऽदं व्याकरणशास्त्रम्। तत्र किं नाम व्याकरणमिति विषये प्रतिपादितो वर्तते यद् व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणमिति। तत्र भर्तृहरिरप्यकथयत्-

> इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
> इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥[1]

तत्र व्याकणशास्त्रं वेदस्य मुखाङ्गतया विवक्षतं वर्तते। पाणिनीयशिक्षायामपि प्रथितम् - मुखं व्याकरणं स्मृतम् इति। प्रयोजनमनुदिश्य न मन्दोऽपि प्रवर्तते इति अब्रवीत् महाभाष्ये महर्षिपतञ्जलिः। व्याकरणशास्त्रस्य उपादेयता तन्महत्ता च सम्यगवबोद्धुं शक्या भवति। अत एव प्रतिपादितोऽस्ति भाष्ये – रक्षोहागमलघ्वसन्देहाः व्याकरणम्। तत्र व्याकरणशास्त्राध्ययनस्यापरमपि प्रयोजनं वर्तते तदस्ति रक्षार्थं वेदानामध्येयं व्याकरणमिति भाव्यम्। यथा अग्नये त्वां जुष्टं निर्वपामीत्यादौ अग्निदेवतामधिकृत्य विधीयमानस्य यज्ञस्य बोधो जायते। यदि सूर्यमधिकृत्य विधीयमानो यज्ञो भवेत् तत्र अग्नये त्वां जुष्टं निर्वपामीति शब्दावबोद्धुं नैव शक्यम्। तत्र सूर्याय त्वां जुष्टं निर्वपामीति शब्दस्योच्चारणं भवति। अत एव व्याकरणशास्त्रं मुख्यत्वेन सम्प्रभूतम्।
बुद्धिसागरसूरीविरचिते 'बुद्धिसागर'नामके ग्रन्थे व्याकरणशास्त्रं पञ्चग्रन्थीति भणितम्। तत्र शब्दानुशासन-धातुपाठ-गणपाठोणादिपाठलिङ्गानुशासनानीति प्रथितानि सन्ति। इत्यतेषु शब्दानुशासनमेव मुख्यत्वेनाङ्गीक्रियते। [2] योऽसौ व्याकरzशास्त्रस्य प्रमुख अंशः।

---

[1] वाक्यपदीयम् (ब्रह्मकाण्डम्) श्लोक १६
[2] व्याकरणशास्त्रस्येतिहास (युधिष्ठिर मीमासकः) भाग २ पृ. १

महर्षिपाणिनिना व्याकरणशास्त्रे तावत् सूत्राणि प्रथितानि मानवाः यावत् शब्दान् नैव विजानीयुः। तत्र न केवलं शब्दानामेव ज्ञानार्थं सूत्राणि सन्ति, परन्तु वेदाध्ययनविषयेऽपि प्रचुरमात्रेण प्रथिताः। विषयेऽस्मिन् पाणिनीयशिक्षायाम् –

उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः।।[3]

अत्र षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः (सा,रे,ग,म,प,ध,नि) इति शब्दाः गेयविषयेऽपि (सामवेदस्य विषयः) उदात्तानुदात्तस्वरितानां विवक्षा उच्चैरुदात्तः, निच्चैरनुदात्तः, समाहारः स्वरितः इति सूत्रत्रये प्रतिभाति। अनेन ज्ञायते यद् वैदिकस्वराणामपि व्याकरणेन सह प्राचुर्येण सम्बन्धोऽस्ति।
इदं व्याकरणशास्त्रं समुद्भूतमपि तु न प्रामाणिकं वचः, यतो हि तत्पूर्वमपि व्याकरणशास्त्रपरम्परा आसीदेव। विषयेऽस्मिन् भगवता पतञ्जलिना महाभाष्ये निगदितमेव- 'बृहस्पतिरिन्द्राय वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम।'[4] अनेन वाक्येन बोधोऽयं ज्ञायते यदस्य शास्त्रस्य प्रयोजनं न केवलमधुनैव अपि तु अति प्राचीनकालादेव अस्य शब्दशास्त्रस्य व्याप्तिरासीत्।
लौकिकवैदिकयोः शब्दासाधुत्वः स्यादिति हेतोरपि व्याकरणस्य प्रयोजनं प्रथितम्। तत्र वेदस्योच्चारणकाले नियमेनैव तस्याध्ययनं विधेयम्। नो चेत् तस्य वेदस्याध्ययनेन कोऽपि न लाभः, अपि तु तेनाध्ययनेनास्माकमेव हानिरेव जायते। तस्मिन् विषये महर्षिपाणिनिना स्वशिक्षायां वर्णितम् –

गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।[5]

अस्य श्लोकस्य विवेचनेनैव ज्ञायते यद् विना व्याकरणेन शब्दाः साधुत्वं नैव युक्तम्। प्रतिभात्युदात्तानुदात्तस्वरितानां विवेचनम्, ह्रस्वदीर्घप्लुतादिभेदाः, अनुनासिकानुनासिकयोः सम्बन्धो व्याकरणतन्त्रेणैव सम्भवति।
प्रकृतिप्रत्यययोः कल्पनापुरस्सरेणैव व्याकरणशास्त्रस्योद्भवो जातः। यद्यपि प्राचीनकालादेव ऐन्द्रादीनां नैकेषां व्याकरणानामविच्छिन्नपरम्परा वर्तते। उक्तमपि-

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।

इत्येतेषु आचार्यपाणिनेः व्याकरणं सर्वेषु व्याकरणेषु श्रेष्ठन्तथा मूर्धाभिषिक्तं चास्ति। अनेनैव शास्त्रेण वर्णानां स्थानानि प्रकल्प्य सरलीकृतानि। विना व्याकरणेन शब्दसाधुत्वं न प्रभवति, असाधुत्वे शब्ददुष्टत्वं समायाति। दुष्टशब्दप्रयोगवारणाय व्याकरणमध्येतव्यम्, यतो हि स्वरतः वर्णतो वा मिथ्याप्रयुक्तः दुष्टशब्दः स्वकीयार्थमनभिधाय वाग्वज्रो भूत्वा यजमानस्यैव अनिष्टमापादयति। यथा – इन्द्रशत्रुर्विवर्धस्व इति शब्दस्य स्वरापराधाद् वृत्रासुरो हतः। तथैव स्वरदोषवशात् वर्णदोषवशाद्वा मिथ्या प्रयुज्यमानः शब्दः प्रयोक्तुं यजमानस्य अनिष्टमुत्पादयति। अतो दुष्टशब्दः परिज्ञानाय, तत्परिहाराय च व्याकरणमध्येयम्। तत्रोक्तं महाभाष्ये –

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।।[6]

व्याकरणस्य परम्परा प्राचीनतमैवास्ति। विषयेऽस्मिन् आचार्यपाणिनिना स्वकीयग्रन्थे अष्टाध्याय्यां शाकल्य-गार्ग्य-चाक्रवर्मण-भारद्वाज-स्फोटायन-गालवादीनां दशप्राचीनवैयाकरणानां नामोल्लेखनं विहितम्। अनेनापि पुष्टिर्जायते यद् व्याकरणशास्त्रं प्राचीनतमत्वम् उरीकरोति। वाल्मीकीयरामायणेनाप्यस्य पुष्टिर्भवति –

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहुव्याहरतानेन न किञ्चिदपभाषितम्। [7]

अनेन श्लोकेनापि ज्ञायते यत् शास्त्रमिदं प्राचीनतममेव। पाणिनिना न केवलं प्राचीनवैयाकरणानां नामोल्लेखनं विहितमपितु तेषां कस्याचित् संज्ञायाः यथावद्ग्रहणमपि स्वकीयाष्टाध्याय्यां कृतम्। उदाहरणार्थं- पाणिनेः 'आङो नास्त्रियाम्' इति सूत्रे आङ् इति पदेन कस्य ग्रहणं भवति? तेनात्र कोऽपि सङ्केतः नैव प्रदत्तः। किन्तु सूत्रस्यास्य व्याख्यानावसरे भट्टोजिदीक्षितः कथयति – आङिति टा संज्ञा प्राचामिति। अत्र प्राचामित्यनेनायं बोधो जायते यत् प्राचीनानामनुसारेणैवात्र आङ् इति पदेन तृतीयाविभक्तिरेकवचनं टा इति संज्ञा, अनेनापि व्याकणतन्त्रं सर्वप्राचीनतममिति ज्ञेयम्।
अस्य शास्त्रस्य प्रवचनकर्तृत्वतैत्तिरीयसंहितायामप्युक्तं वर्तते – "वाग् वै पराच्यव्याकृता अवदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुरु इति तामिन्द्रो व्याकरोत्।" उपर्युक्तवाक्येनैव सिद्धिरिदं जायते यद् व्याकरणशास्त्रपरम्परा स्रष्टुः काले एव सृष्टा तथा सर्वप्राचीनतमा एव। विशेषरूपेणाल्पीयस शब्देनाधिकशब्दानां ज्ञानमप्यस्य शास्त्रस्य वर्तते वैशिष्ट्यम्। अत एव नागेशः परिभाषेन्दुशेखरे प्रतिपादयति – "अर्द्धमात्रलाघवेन पुत्रोत्सवं मन्यन्ते वैयाकणाः" [8] इति।
महान् हि शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा वाह्वृच्यं नवधाथर्वणो वेदः, वाकोवाक्यम्, इतिहासः, पुराणम् इत्येतावाञ्छब्दस्य प्रयोगविषयः।[9] इति प्रामाण्येनापि सिद्धिर्भवति यत् कस्मिंचिदपि समये संस्कृतभाषायाः प्रयोगक्षेत्रमत्यन्तं विस्तृतमासीत्। यदस्य जगतः समेषां भाषाणां नवीनप्राचीनयोः स्वरूपस्य तुलना क्रियते चेदयं बोधो भवति यत् तेषां सर्वप्राचीनतमेयं भाषा दरीदृश्यते। तदान्यभाषाणां नवीनस्वरूपविकासायेयं संस्कृतभाषाम् अपेक्षतेस्म। व्याकरणमहाभाष्यकारस्याभिमतेनायं बोधो भवति यत् संस्कृतभाषाविकासाय व्याकरणशास्त्रमपेक्षते। अत एवास्या भाषायाः महत्वैशिष्ट्यं तथावश्यकताङ्गीक्रियते।
प्राचीनकालादेव व्याकरणशास्त्रं मन्यन्ते स्म। आचार्यलोकमणिदाहालोऽपि अस्य वैयाकरणशास्त्रस्य प्राचीनताविषये परमलघुमञ्जूषाभूमिकायां कथयति- व्याकरणदर्शनपरम्परा हि कदाप्रभृत्यारब्धेति न शक्यते याथातथ्येन वक्तुम्। एतद्विषयेऽस्माकमेतावदेव ज्ञानं यदसौ सूत्रपरम्परातोऽपि प्राचीनतरा विद्यते। [10]
मध्यवर्तीभिः आचार्यैः शास्त्रमिदं प्रक्रियाग्रन्थमुरीकृत्य प्रथमसोपानस्य प्रगतिशीलयुक्तश्चक्रुः। प्रकृतिः, प्रत्ययस्तथा तत्तदर्थज्ञानमेवास्य प्रथमसोपानस्य मुख्याङ्गं चासीत्। तदैव श्रीमता भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुदीनामको ग्रन्थो विरचितः। यस्याशयः लौकिकानां वैदिकानाञ्च शब्दानां ज्ञानार्थं सुलभो भवेदिति। प्रक्रियापक्षे एव तत्र भगवान् पतञ्जलिः व्याकरणमहाभाष्ये प्रतिपादयति यत्- इह तावत् समानायामर्थावगतौ शब्देन चापशब्देन धर्मनियमः क्रियते। शब्देनैवार्थोऽभिधेयः, नापशब्देनेति। अनेनायम् अवबुध्यते यदस्य शास्त्रस्याध्ययनेन न केवलं शब्दज्ञान एव लाभः अपितु धर्मनियमोऽपि शास्त्रेणैव क्रियते। केचनमते व्याकरणशास्त्रमवलम्ब्य एवमुल्लिखितम् – साधुशब्दावधिकं असाधुशब्दकर्मकं पृथक्करणं व्याकरणमिति। विषयेऽस्मिन्नेव आचार्य भर्तृहरिः कथयति –

शिष्टेभ्य आगमात्सिद्धाः साधवो धर्मसाधनम्।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः।। [11]

दर्शनरूपेण व्याकरणशास्त्रस्य द्वितीयसोपानमप्यङ्गीक्रियते। व्याकरणशास्त्रं न केवलं शब्दसाधुत्वमेव परन्तु प्रकृत्यर्थः, प्रत्ययार्थादीनां तत्तत्सम्बन्धीविषायाणामपि प्रतिपादनं करोति, तदेव शब्दबोधकमपि वर्तते। वाक्यवाक्यार्थयोर्निरूपणप्रसङ्गे

[3] पाणिनीयशिक्षा श्लोक १२
[4] व्याकरणमहाभाष्यम् पस्पशाह्निकम्
[5] पाणिनीयशिक्षा ३२
[6] व्याकरणमहाभाष्यम् (पस्पशाह्निकम्)
[7] वाल्मीकियरामायण किष्किन्धा काण्ड ३.२९
[8] परिभाषेन्दुशेखरः संख्या १३३
[9] व्याकरण शास्त्र का इतिहास, (युधिष्ठिरो मीमीसकः) भाग १
[10] परमलघुमञ्जूषा (किञ्चित्प्रास्ताविकम्) आचार्य लोकमणि दाहाल
[11] वाक्यपदीयम् (ब्रह्मकाण्ड) श्लोक २७

पदपदार्थनिरूपणमप्यावश्यकन्तथा पदपदार्थेन सह प्रकृतिप्रत्ययार्थयोरपि निरूपणं करणीयम्। अत एवैतेषां ज्ञानार्थमेव अस्य शास्त्रस्य विषयमूलं ज्ञापयति। यथा - घटः इति शब्दस्योच्चारणे तस्य घटपदार्थस्यापि ग्रहणमावश्यकं, यदि घटपदार्थस्य ज्ञानाभावे घटशब्दस्यौच्चित्यं नैव साधुत्वमिति ज्ञानायैव व्याकरणशास्त्रं दर्शनरूपेणैव मन्यन्ते।

ऋषीणां तपःस्थलरूपेण जानन्ति भारतभूमिं सकलप्राणिनः। तेषामृषीणां तपः स्वार्थप्रेरितं नासीत्, अपितु सम्बन्धस्यास्य केवलं सामाजिकसंरचनायान्तथा पद्धतिविषये एवासीत्। तैः प्राणिनां सर्वाङ्गीणकल्याणायाजीवनं प्रयत्नः कृतः। अनेनैव लक्ष्येणाभिप्रेरितं चिन्तनं तपसो वा निर्कर्षं हि समर्पितं स्वजीवनं तैः संस्कृतभाषायाम्। तेषामपि ऋषीणां मते सर्वभाषासु प्राधान्येन व्याकरणशास्त्रं प्रथितम्। पाश्चात्यभाषासु विज्ञानमङ्गरूपेणाङ्गीक्रियते, परन्तु पूर्वीयचिन्तनधारासु सर्वाषां भाषाणामङ्गीरूपेण स्वीकार्यमिदं शास्त्रम्। शास्त्रस्यास्याधारेणैव भाषायाः शुद्धता दरीदृश्यते। शास्त्रमिदं शब्दान् व्युत्पादयति न तथा शब्दानामुत्पादनम्, शास्त्रेऽस्मिन् शब्दनित्यः स्वीक्रियते, यत्र शब्दोच्चारणं भवति तदपि सिद्धम् एव तेन शब्देन प्रतीतपदार्थोऽपि सिद्धः, अत एव महाभाष्ये 'सिद्धे शब्दार्थः सम्बन्धे' इति प्रतिपादयति भाष्यकारः। तत्रैव मङ्गलाचरणरूपेण 'अथ शब्दानुशासनम्' अपि प्रतिपादितमस्ति। अनेनापि अवबुध्यते यत् शास्त्रमिदं न केवलम् आध्यात्मिकानां विषयः परन्तु वैज्ञानिकरूपेणापि मननं कर्तुं प्रभवति।

महर्षिभिः मानवैर्वा व्याकरणशास्त्रं परिष्कृतं परिनिष्ठितञ्चेति प्रमाणीकृतमस्ति, परन्तु केन कारणेनेदं परिनिष्ठितं परिष्कृतञ्चास्ति? इति शङ्कायां प्रतिपाद्यते यत् ग्रन्थोऽयं न केवलमेकेन महर्षिणा प्रतिपादितो विषयः। अस्मिन् सूत्रकारेण केवलं सूत्राणामेव निर्वचनं विहितम्, तदुत्तरवर्ती तत्र न्यूनातिरिक्तं प्रपूरणार्थं कात्यायनेन वार्तिको रचितः, यदा पूर्णरूपेण शास्त्रं प्रथितन्तदा महर्षिपतञ्जलिना व्याख्यात्मकरूपेण भाष्यं लिखितम्। अत एव महर्षिभिः सम्मार्जितहेतुरिदं शास्त्रं प्राधान्यं परिष्कृतं प्रथितञ्चास्ति।

संस्कृतव्याकरणं तत्राष्टौ स्थानानि प्रकल्प्य प्रवृतिर्ज्ञापयति। तैरष्टभिः स्थानैः सर्वे वर्णाः समुच्चार्यन्ते। पाणिनीयशिक्षायां विषयेऽस्मिन् प्रथितञ्च –

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च॥ [12]

कस्य वर्णस्य कस्मात् स्थानादुच्चारणं भवेदिति अनेनैव शिक्षेति। अस्य संस्कृतव्याकरणशास्त्रस्य विशेषतैका वर्तते यदन्यासु भाषासु केवलं एकबहुवचनयोरेव विवक्षा प्रकल्प्यते, परन्तु संस्कृतव्याकरणशास्त्रे द्विवचनस्यापि सम्प्रभूतो भवति। अस्मिन् विषये सुपः १.४.१०३ इति सूत्रे (सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः) [13] प्रतिपादितो वर्तते। तेनैव व्याकरणशास्त्रेण विधीयमानो शब्दो ब्रह्मत्वरूपेणाङ्गीकृतो भवति।

शब्दब्रह्म अस्ति। ब्रह्म तदेवास्ति यदनाद्यनन्तञ्च। अनाद्यनन्तशब्दो ब्रह्मपरावाक् एव अस्ति एवं पदार्थरूपेषु समुत्पद्यते। तदेव वाचकाभिधानन्तथा नामशब्दादेव प्रवाच्यते। शब्दब्रह्मैव अभिधेयाभिधानात्मक प्रपञ्चोत्पादनानुकूलशक्त्यवच्छिन्नम् अस्ति।

यद्यपि नित्यब्रह्मात्मकशब्दव्याक्रिया व्याकरणस्यातिरिच्योऽस्ति तथापि रेखागवयन्यायेन "असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" इत्यभियुक्तस्य आधारेण व्याकरणद्वारा शब्दस्य व्याक्रिया क्रियते। अनेनैव प्रकारेण व्याकरणशास्त्रशब्दस्य व्युत्पादनेन सर्वशास्त्रोपकारकं भवति। तदेव व्याकरणमस्ति येन भाषायाः विशुद्धपरिमार्जितरूपेणोपस्थीयते। धातुप्रत्यययोः आधारेण शब्दानां निर्माणं विधाय तदन्तराले निहितस्वरसिकोऽर्थस्याभिव्यक्तिमुपस्थापयतीदं व्याकरणशास्त्रम्। तदेवास्य प्राधान्यं लक्ष्यमस्ति। तदेव व्याकरणशास्त्रं येन सर्वासां भाषाणामबाधरूपेणालोडनं सम्यकतया कर्तुं शक्नोति। अत एव भर्तृहरिः कथयति –

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥ [14]

अर्थात् – विलक्षणशब्दस्य यथार्थबोधकः व्याकरणं विना असाध्योऽस्ति नास्त्युपायान्तरं वा। अत एवास्य शास्त्रस्योपादेयता शक्यते लौकिकालौकिकदार्शनिकाध्यात्मिकरूपेणावबोद्धुम्।

## उपसंहार

वैदिकलौकिकानां शब्दनिबन्धनं व्याकरणशास्त्रेणैव क्रियते, इति सर्वेषां मतम्। संज्ञा-सन्धि-लिंग-समासप्रभृतिषु विषयेष्वनेन शास्त्रेण पूर्णज्ञानाम् आडोलयति। उपर्युल्लिखितेषु विषयेषु शास्त्रस्यास्य कथं लौकिकवैदिकयोर्मध्ये अन्तःसम्बन्धो भवति, शब्दानां साधुत्वं कथं विधीयते, का व्याकरणस्यौपादेयतेति प्रतिपादितो वर्तते।

वेदध्यायनकाले षड्गुणाः अवलोकिताः सन्ति। यथा-
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥

इत्येतेषु विषयेषु एकोऽपि त्रुटिर्भवति तत्र प्रायश अधम एव। अतोऽस्य ज्ञानाय व्याकरणस्याशयो भवति। महाभाष्येऽपि भाष्यकारः कथयति – आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति। अत एव प्रायश्चित्तीया मा भूम इति हेतोरेव व्याकरणस्य प्राधान्यमिति।

## सन्दर्भग्रन्था

1. वाक्यपदीयम् (ब्रह्मकाण्डम्) व्याख्याकारः डॉ. शिवशङ्कर अवस्थी
2. वैयाकरणसिद्धान्तकौमुदी (श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता भाग १) व्याख्याकारः श्री गोविन्दाचार्यः)
3. परमलघुमञ्जूषा व्याख्याकारः आचार्य लोकमणिदाहालः
4. पाणिनीयशिक्षा, व्याख्याकारः शिवराज आचार्यः कौण्डिन्न्यायनः
5. व्याकरण शास्त्र का इतिहास (युधिष्ठिरो मीमांसकः)
6. व्याकरणमहाभाष्यम्, व्याख्याकारः आचार्यमधुसूदनप्रसादमिश्रप्रणीतया प्रकाश हिन्दीव्याख्योपेतः)
7. परिभाषेन्दुशेखरः, व्याख्याकारः आचार्य विश्वनाथमिश्रः
8. लघुशब्देन्दुशेखरः, (पञ्चसन्ध्यन्तः प्रथमो भागः) व्याख्याकारः आचार्य विश्वनाथमिश्रः

[12] पाणिनीयशिक्षा श्लोक १३
[13] लघुसिद्धान्तकौमुदी (गीताप्रेस गोरखपुर) पृ. ३२
[14] वाक्यपदीयम् (ब्रह्मकाण्डम् श्लोक १३